# संस्कृतम्

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभयन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। सर्वासु भारतीयभाषासु संस्कृतभाषा अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम् साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च–

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः।।

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेऽस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि–**

- ❖ संस्कृतभाषया कथितान् निर्देशान् श्रुत्वा पठित्वा च तदनुसारं व्यवहारं कर्तुं समर्थाः भवेयुः।
- ❖ संस्कृते लिखिताः लघुकथाः पद्यानि च श्रुत्वा पठित्वा वा तानि अवगच्छेयुः।
- ❖ संस्कृतभाषया लघुवाक्यानि वदेयुः।
- ❖ पाठ्यपुस्तके प्रदत्तान् पाठान् श्लोकान् च पठित्वा भावं ग्रहीतुं समर्थाः भवेयुः।
- ❖ प्रदत्तविषयं चित्रं वा आधृत्य संस्कृतेन सरलवाक्यानि रचयेयुः।
- ❖ श्लोकानां सस्वरवाचने समर्थाः भवेयुः।
- ❖ संस्कृतभाषया सरलपत्राणि लघून् अनुच्छेदान् च लेखितुं समर्थाः भवेयुः।

- ❖ संस्कृतभाषां साहित्यं च प्रति समुत्सुकाः भवेयुः।
- ❖ मातृभाषायां प्रयुक्तसंस्कृतशब्दान् अभिज्ञातुं समर्थाः भवेयुः।
- ❖ नैतिक-सामाजिक-राष्ट्रियमूल्यानां विकासः भवेत्।
- ❖ वसुधैव-कुटुम्बकम् इति भावनाविकासः।
- ❖ परस्परं संस्कृतसभाषणेन भावविनिमयः।
- ❖ श्रवण-भाषण-पठन-लेखनेति चतुर्णां भाषिक-कौशलानां विकासः।
- ❖ बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानम्।
- ❖ मानसिकविकासानन्दानुभूतिः रसानुभूतिश्च।
- ❖ संस्कृतभाषायाः भारतीयसंस्कृतेः च संरक्षणं संवर्धनञ्च।
- ❖ आत्मानुशासनसंस्थापनम्।
- ❖ संस्कृतभाषया छात्राणां सर्वविधविकासः।

**अवधातव्यम्–** सम्पूर्णपाठयक्रमम् आधृत्य सत्रान्ते एकवारमेव वार्षिकी परीक्षा भविष्यति।

**परीक्षा-प्रारूपम्–**

- वार्षिक परीक्षा — 80 अङ्काः
- आन्तरिकमूल्याङ्कनम् — 20 अङ्काः

**अधिगमप्रतिफलानि**

**'क' भागः – अपठितावबोधनम्**

- छात्रः अपठितं गद्यांशम् अनुच्छेदं वा पठित्वा तस्य भावम् अवगच्छति। तत्र प्रदत्तानां प्रश्नानाम् उत्तराणि सः तार्किकचिन्तानुसारं लिखति।
- छात्रः अपठितं गद्यांशम् अनुच्छेदं वा पठित्वा तस्य केन्द्रियभावम् अवगम्य शीर्षकं निर्धारयति।
- छात्रः अनुच्छेदे गद्यांशे वा विद्यमानानि भाषिकतत्त्वानि परिचिनोति।

**'ख' भागः – रचनात्मककार्यम्**

- छात्रः प्रदत्तं पत्रं तस्य भावं च अवगत्य मञ्जूषायां प्रदत्तपदसहायतया रिक्तस्थानानि पूरयति।
- छात्रः चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृतेन वाक्यानि रचयति।
- छात्रः मञ्जूषायाः सहायतया प्रदत्तं विषयम् आधृत्य संस्कृतेन अनुच्छेदं लिखति।
- छात्रः अपठितायाः कथायाः संवादस्य वा भावम् अवगत्य मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयति।

**'ग' भागः – अनुप्रयुक्तव्याकरणम्**

- छात्रः सम्यक्तया वर्णविच्छेदं वर्णसंयोजनं च करोति।
- छात्रः पाठेषु प्रयुक्तानि सन्धियुक्तपदानि परिचीय सन्धिच्छेदं करोति।
- छात्रः वाक्यानुगुणं शब्दरूपाणां धातुरूपाणां च समुचितं निर्णयं करोति।
- छात्रः शतपर्यन्त सङ्ख्याः वाक्येषु प्रयोगं करोति।
- छात्रः कारकोपपदविभक्ति-नियमानां चिन्तनं कृत्वा निर्देशानुसारम् उत्तरति।
- छात्रः प्रत्ययोपसर्गाव्ययपदानां विवेचनं कृत्वा प्रयोगं कर्तुं शक्नोति।

**'घ' भागः – पठितावबोधनम्**

- छात्रः गद्यांशं, पद्यांशं संवादं च पठित्वा तद्भावम् अवगच्छति। तत्र प्रदत्तानां प्रश्नानाम् उत्तराणि सः निर्देशानुसारं लिखति।
- छात्रः गद्यांशे, पद्यांशे संवादे च विद्यमानानि भाषिकतत्त्वानि परिचिनोति।
- छात्रः प्रश्नवाचकपदानां समुचितं प्रयोगं कृत्वा प्रश्नवाक्यानि रचयति।
- छात्रः प्रसङ्गानुसारं प्रदत्तपदानाम् अर्थं चिनोति।
- छात्रः श्लोकस्य अन्वयं लेखितुं शक्नोति।

## पाठयक्रमस्य विवरणम्

## अङ्कविभाजनं कालांशनिर्धारणञ्च

| क्र.सं. | भागः/खण्डः | विषयः/पाठाः | निर्धारित-अङ्काः | कालांश-संङ्ख्या |
|---|---|---|---|---|
| 1. | 'क' भागः<br>अपठितावबोधनम्<br>(10 अङ्काः | एकः सरलसंस्कृतगद्यांशः<br>(60-80 शब्दमितः) | 10 | 10 |
| 2. | 'ख' भागः<br>रचनात्मककार्यम्<br>(15 अङ्काः) | • पत्रलेखनम्<br>(रिक्तस्थानपूर्तिद्वारा)<br>• चित्रवर्णनम् अथवा<br>अनुच्छेदलेखनम्<br>• संवादपूर्तिः कथापूर्तिः<br>वा (मञ्जूषायाः सहायतया<br>रिक्तस्थानपूर्तिमाध्यमेन) | <br>5<br>5<br><br>5 | <br>15 |
| 3. | 'ग' भागः<br>अनुप्रयुक्तव्याकरणम्<br>(25 अङ्काः) | • वर्णमाला–वर्णविच्छेदः<br>वर्णसंयोजनञ्च<br>• **सन्धिः** –<br>**स्वरसन्धयः** – दीर्घः,<br>गुणः, वृद्धिः, यण्<br>**व्यञ्जनसन्धिः** –<br>म् स्थाने अनुस्वारः<br>• **शब्दरूपाणि** –<br>अकारान्तपुल्लिङ्गशब्दाः<br>रामवत्<br>आकारान्तस्त्रीलिङ्गशब्दाः<br>लतावत्<br>अकारान्तनपुंसकलिङ्गशब्दाः<br>फलवत् | 2<br><br><br><br>2<br>1<br><br>3 | 50 |

| | | | | | |
|---|---|---|---|---|---|
| | | इकारान्त पुल्लिङ्गशब्दाः<br>मुनिवत्<br>इकारान्तस्त्रीलिङ्गशब्दाः<br>नदीवत्<br>उकारान्तपुल्लिङ्गशब्दाः<br>साधुवत्<br>सर्वनामशब्दाः – किम्<br>तत्, एतत् (त्रिषु लिङ्गेषु)<br>अस्मद्, युष्मद्, भवत्<br>(पुल्लिङ्गे) | | | |
| | | • **सङ्ख्या –** एकतः चतुः<br>पर्यन्तं त्रिषु लिङ्गेषु केवलं<br>प्रथमा-विभक्तो पञ्चशतः<br>शतं पर्यन्तम् | 1<br><br>2 | | |
| | | • **कारकाणि उपपदविभक्तयः च**<br>द्वितीया – परितः, उभयतः<br>प्रति, गम्, विना<br>तृतीया–अलम्, सह, विना<br>चतुर्थी–नमः, दा, रुच्<br>पञ्चमी–बहिः, पृथक्, विना<br>षष्ठी–उपरि, अधः, पुरतः<br>पृष्ठतः<br>सप्तमी–विश्वस्, स्निह्, निपुण | 1<br>3 | | |
| | | • **धातुरूपाणि**<br>**परस्पैदिनः –** पठ्, गम्, दृश्,<br>स्था, स्मृ, भू, अस्, वद्, कृ,<br>पा, लिख्, नम्<br>पञ्चसु लकारेषु) | <br>2 | | |

| | | | | |
|---|---|---|---|---|
| | | **आत्मनेपदिनः – (लट्लकारे)**<br>सेव्, लभ्, रुच्, शुभ् | 1 | |
| | | • **प्रत्ययाः – क्त्वा, ल्यप्, तुमुन्** | 3 | |
| | | • **अव्ययपदानि–**<br>अत्र, तत्र, कुत्र, सर्वदा, यदा, तदा, कदा, इतस्ततः, अपि, कुतः, कथम्, किमर्थम्, अधुना, एव, उच्चैः, ह्यः, अद्य, श्वः | 2 | |
| | | • **उपसर्गाः –**<br>अनु, अव, आ, उत्, उप्, अप, निर्, दुर्, नि, प्र, प्रति, परि, वि, सम्, सु | 2 | |
| 4. | 'घ' भागः<br>पठितावबोधनम् | • गद्यांश-आधारिताः प्रश्नाः | 5 | 60 |
| | | • पद्य (श्लोक)-आधारिताः प्रश्नाः | 5 | |
| | | • नाट्य (संवाद) आधारिताः प्रश्नाः | 5 | |
| | | • श्लोकान्वयः अथवा भावार्थः (रिक्तस्थानपूर्तिमाध्यमेन) | 4 | |
| | | • प्रश्ननिर्माणम् | 4 | |
| | | • कथापूर्तिः (मञ्जूषायाः सहायतया (रिक्तस्थानपूर्तिमाध्यमेन) | 3 | |
| | | शब्दार्थचयनम् | 4 | |
| | | **परीक्षायै निर्धारिताः पाठाः**<br>1. सुवचनानि | | |

| | | | | |
|---|---|---|---|---|
| | | 2. वसुधैव कुटुम्बकम्<br>3. अहं नदी अस्मि<br>4. क्षमस्व महर्षे!<br>5. दिव्या गीर्वाणभारती<br>6. मधुराणि वचनानि<br>7. सफलं तस्य जीवितम्<br>8. क्रोधेन कार्यं न सिध्यति<br>9. अविश्वस्ते न विश्वसेत्<br>10. गुणाः पूजास्थानम्<br>**केवलम् आन्तरिकमूल्याङ्कनाय पाठौ–**<br>11. हितं मनोहारि च दुर्लभं वचः<br>12. स्वाध्यायात् मा प्रमदः | | |

**अवधेयम्–**

अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'सुरभिः तृतीयो भागः इति' पाठयपुस्तकात् करणीयम्।

## प्रश्नानां प्रकाराः अङ्कविभाजनञ्च

| क्र.सं. | प्रश्न-प्रकारः | प्रश्न-सङ्ख्या | निर्धारिताङ्काः |
|---|---|---|---|
| 1. | बहुविकल्पात्मकाः (1 अङ्कः) | 20 | 20 |
| 2. | अतिलघूत्तरात्मकाः (½ अङ्कः) | 6 | 3 |
| 3. | अतिलघूत्तरात्मकाः (1 अङ्कः) | 6 | 6 |
| 4. | लघूत्तरात्मकाः (1 अङ्कः) | 15 | 15 |
| 5. | दीर्घोत्तरात्मकाः | 13 | 18 |
| 6. | निबन्धात्मकाः | 4 | 18 |
| | योगः | 64 | 80 |

## आन्तरिक-मूल्याङ्कनम्
## ( 20 अङ्काः )

### उद्देश्यानि

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण–भाषण–पठन–लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र.सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक परीक्षाः ( पीरियोडिक्-असैस्मैंट )** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2. | **बहुविधमूल्याङ्ककनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्ककनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्यायोजनम्<br>❖ शब्दपूर्तिः<br>❖ साक्षात्कारः<br>❖ सर्वेक्षणम्<br>❖ संवादः<br>❖ स्वपरिचयः<br>❖ परिवेशपरिचयः<br>❖ सामूहिकचर्चा<br>❖ कक्षाप्रस्तुतिः (चित्रकथा, कथावाचनम्)<br>❖ बहुभाषिकतायाः व्यवहारः<br>❖ भूमिकानिर्वाहः | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖ मौलिकता<br>❖ विषयसम्बद्धता<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् |

| | | | | | |
|---|---|---|---|---|---|
| | | ❖ पी.पी.टी. निर्माणम्<br>❖ ऑडियो-वीडियो आदीनि<br>❖ क्रीडा-एकीकरणसम्बन्धिनः क्रियाकलापाः (गतिविधयः) | | | |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ गृहकार्यम्<br>❖ कार्यपत्राणि<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः<br>❖ कला-एकीकरणसम्बन्धिनः क्रियाकलापाः (गतिविधयः)<br>❖ बहुविषयकपरियोजना | 5 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ कार्यसंयोजनं प्रस्तुतिः च (स्वच्छकार्यम्, आकर्षम्, सुलेखः, विवरणिका, आवरणम्)<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता<br>❖ विषयबद्धता<br>❖ कार्यपूर्णता<br>❖ पाठ्यचर्यानुगुणं जातस्य छात्राविकासस्य साक्ष्यानि |
| 4. | **भाषा-संवर्धनाय गतिविधयः**<br>(क) श्रवण-भाषण-कौशलम् | ❖ कथा<br>❖ संवादः/वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि श्लोकोच्चारणम् प्रहेलिकाः | 5 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् (आरोहावरोह-गतियति-प्रयोगः) |

| | | | | | |
|---|---|---|---|---|---|
| | (ख)<br>**लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिक लेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या, पर्यावरणम्, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ दैनन्दिनीलेखनम्<br>❖ सङ्केताधारितं कथालेखनम्<br>❖ भित्तिपत्रिकायाः निर्माणम्<br>❖ श्रुतलेखः<br>❖ सूक्तिलेखनम् | | ❖ छात्राः यथाशक्यं कक्षायमेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी–पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |

**ध्यातव्यम्–**

पाठः 11 हितं मनोहारि च दुर्लभं वचः

पाठः 12 स्वाध्यायात् मा प्रमदः

एतौ पाठौ केवलम् आन्तरिकमूल्याङ्कनाय स्तः। एतयोः पाठयोः निम्नक्रियाकलापाः कारयितुं शक्यन्ते–

1. समभावसूक्तिचयनम्
2. सूक्तिपट्टिकालेखनम्
3. उपदेशवाक्यानां चयनं कृत्वा भित्तिपत्रिकानिर्माणम्
4. चित्रैः सूक्तेः भावस्पष्टीकरणम्
5. सूक्तेः भावार्थकथनम्
6. सूक्तेः भावार्थलेखनम्
7. पी.पी.टी. निर्माणम्

**अवधातव्यम्–**उपर्युक्त–गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति।

**निर्धारितपाठ्यपुस्तकम्–** 'सुरभि' तृतीयो भागः